International Journal of Sanskrit Research 2018; 4(1): 19-21

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2018; 4(1): 19-21
© 2018 IJSR
www.anantaajournal.com
Received: 06-11-2017
Accepted: 07-12-2017

**रुचि**
शोधच्छात्रा साहित्यविभागः
वेदव्यासपरिसरः, हिमाचलप्रदेशः

**Correspondence**
**रुचि**
शोधच्छात्रा साहित्यविभागः
वेदव्यासपरिसरः, हिमाचलप्रदेशः

# व्याकरणोदाहरणकाव्यपरम्परा

**रुचि**

**प्रस्तावना**

**उपजीव्यान्युदाहरणकाव्यानि**

सरसरीत्या व्याकरणप्रक्रियां शिक्षयितुं व्याकृतानां पदानां प्रयोगाभ्यासं च कारयितुं प्राचीनकालत एव व्याकरणोदाहरण-समापनीयानां काव्यानां रचनायाः परम्परा विद्यते। महाभाष्ये प्रयोगप्रदर्शन-प्रसङ्गे उद्धृतैः कतिपयैः पद्यैरेतस्याः परम्परायाः सङ्केतो लभ्यते।

स्तोष्यामहं पादिकमौदवाहिं,
ततः श्वभूते शातनीं पातनीं च।
नेतारावागच्छतां धारणिं रावणिं च।
ततः पश्चात् स्रंस्यते ध्वंस्यते च।। (महा० १.१.५६)
बहूनामप्यचित्तानामेको भवति चित्तवान्।
पश्य वानरसैन्येऽस्मिन् यदर्कमुपतिष्ठते।। (महा० १.३.२५)
मैवं मंस्थाः सचित्तोऽयमेषोऽपि हि यथा वयम्।
एतदप्यस्य कापेयं यदर्कमुपतिष्ठति।। (महा० १.३.२५)

अस्यां परम्परायां वैयाकरणशिरोमणि-महाकविभट्टिप्रणीतं रावणवधं नाम भट्टिकाव्यम्, व्याकरणार्णवकर्णधारेण महाकविना भूमभट्टेन रचितम् अर्जुनरावणीयं महाकाव्यम्, महाकविहलायुधप्रणीतं विशिष्टधातुप्रयोगप्रधानं कविरहस्यं नाम काव्यम्, आचार्यहेमचन्द्रसूरिणा प्रणीतं स्वीयव्याकरणोदाह-रणसमापनीयं द्व्याश्रयमहाकाव्यम्, केरलाभिजनेन ब्रह्मदत्तसूनुना नारायणकविना रचितं सुभद्राहरणं महाकाव्यम्, केरलवास्तव्येन वासुदेवकविना प्रणीतं वासुदेवविजयं नाम काव्यम्, केरलकविकुलतिलकेन वैयाकरणवृन्दारकेण नारायणभट्टेन प्रणीतं धातुकाव्यम्, इत्यादीनि व्याकरणोदाहरणकाव्यानि सुविख्यातानि सन्ति।

प्राचीनकाले खल्वियं परम्परा विपुलसंख्यैरीदृशैः काव्यरत्नैः सुतरां सम्पन्नाभूत्। सम्प्रति तूपरिनिर्दिष्टानि कानिचिदेवावशिष्टानि। प्राक्तनानां बहूनां लुप्तानाम् उदाहरणकाव्यानां श्रवणरमणीयानि सहृदयहृदयहारीणि पद्यानि यत्र तत्र प्रकीर्णमणिरूपेण विद्वज्जनलोचन-गोचराणि सन्ति बलादिवावर्जयन्ति सचेतसां चेतांसि। टीकाकारशि-रोमणिर्महामहोपाध्यायो मल्लिनाथ एतादृशं व्याकरणोदाहरणसमापनीयं काव्यम् उदाहरणकाव्यम् इति व्यपदिशति भट्टिकाव्यव्याख्यारम्भे।

उदाहरणानां वाक्यगतप्रयोगप्रदर्शनाय शोधप्रबन्धेऽस्मिन् पूर्वनिर्दिष्टानि प्राचीनान्युदाहरणकाव्यानि अपि उपजीव्यत्वेनाश्रितानि। एतदतिरिक्तानि रामायण-महाभारत-रघुवंश-किरातार्जुनीय-शिशुपालवध-नैषधीयचरित-चम्पूभारत-उदारराघव-अनर्घराघव-दूताङ्गदादीन्यपि यत्र तत्र प्रयोगप्रदर्शनाय समुद्धतानि।

**भट्टिकाव्यम्:** सुरभारतीसाहित्याम्बरे देदीप्यमाना ग्रन्थरत्नेषु गुणगरिम्णा विराजमानं भट्टिकाव्यं तथा च तत्प्रणेतारं भट्टिकविञ्जकोऽस्ति विचक्षणो यो न जानाति। भट्टिनाम्नः कवेः सुयशः संरक्षितुं परवर्त्तिनः समीक्षकाः कविना भट्टिना प्रणीतस्य रावणवधाख्यद्वाविंशतिसर्गात्मकमहाकाव्यस्य नाम भट्टिकाव्यं कृतवन्त इति। रावणवधापरनामकं भट्टिकाव्यं पाणिनीयव्याकरणस्योदाहरणकाव्यत्वेन तदध्येतृणां परमोपकारतया सातिशयं वैशिष्ट्यं भजते। द्वाविंशतिसर्गात्मकेऽस्मिन्काव्ये पञ्चविंशत्युत्तरषोडशशतसंख्याकाः (१६२५) श्लोकाः उपलभ्यन्ते।

सम्प्रति उपलभ्यमानेषु उदाहरणकाव्येषु भट्टिकाव्यमेव प्राचीनतममस्ति। अत्र निरतिशयप्रौढतया उदाहरणानां प्रयोगाः प्रदर्शिताः सन्ति। भट्टिकाव्यस्य कालः सप्तमं खीस्तशतकं मन्यते। एवमस्य विद्वत्समाजे महती प्रसिद्धिः सञ्जाता। परवर्त्तिभिः ग्रन्थकारैः प्रयोगपर्यालोचनप्रसङ्गे भट्टिकाव्यस्य उदाहरणानि बाहुल्येन प्रस्तूयन्ते। अष्टाध्याय्याः वृत्तिकारः पुरुषोत्तमदेवः, हेमचन्द्राचार्यः, दुर्घटवृत्तिकारः शरणदेवः, अन्ये चापि बहवः प्रसिद्धाः वैय्याकरणाः विद्वांसः भट्टिकाव्यं यत्र समुद्धरन्ति।

**अर्जुनरावणीयम्:** उदीच्यमातृकाणां पुष्पिकासु अर्जुनरावणीयं रावणार्जुनीयम् इत्युभयथापि व्यवहारो दृश्यते, कैरलीषु मातृकासु 'अर्जुनरावणीयम्' इत्येव नाम लभ्यते। 'अजाद्यदन्तम्'[१] इति विधानानुसारितया 'अभ्यर्हितं च पूर्वं निपततीति वक्तव्यम्''[२] इति वचनानुरोधेन च अर्जुनस्याभ्यर्हितत्वात् 'अर्जुनरावणीयम्' इत्येव युक्ततरं भाति। अर्जुनश्च[३] रावणश्च अर्जुनरावणौ तावधिकृत्य कृतं काव्यम् अर्जुनरावणीयम्। 'अधिकृत्य कृते ग्रन्थे'[४] इत्यधिकारे 'शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः'[५] इति छप्रत्ययः।

कथावस्तु-विश्वविजयप्रसङ्गेन विचरतो रावणस्य कार्त्तवीर्यराजधानीं माहिष्मतीमागत्य युद्धायाह्वानम्, युद्धे अर्जुनकृतो रावणस्य पराजयः, रावणस्य च कारागारे बन्धनम्। ततश्च तत्पितामहस्य पुलस्त्यस्याग्रहेण मैत्रीसन्धिपुरस्सरं रावणस्य मोक्षणम्-इति कथावस्तु अस्मिन् काव्ये वर्णितमस्ति।

साहित्यशास्त्रे निर्दिष्टैः सर्गबन्धादिरूपैः प्रायः सर्वैर्महाकाव्योचितलक्षणैर्भूषितम् इदं महाकाव्यं सत् व्याकरणोदाहरण-प्रदर्शनपरत्वात् शास्त्रमप्यस्ति। अत एव क्षेमेन्द्रेण 'काव्यशास्त्र' कोटिगतत्वेनेदं निर्दिष्टम्। पूर्वोक्तं कथावस्तूपजीव्य अष्टाध्यायीसूत्रपाठक्रमेण काव्ये सूत्रोदाहरणानां गुम्फनमेवास्य शैलीगतं वैशिष्ट्यमितरोदाहरणकाव्यातिशायि विद्यते। अनया विधया रचितमिदमेकमेवाद्वितीयं प्राचीनं महाकाव्यमस्ति। अत्र वैदिकसूत्राणि स्वरसूत्राणि च नैवोदाहृतानि। अर्जुनरावणीये २२९० सूत्राणि, ५० वार्तिकानि चोदाहृतानि।

अर्जुनरावणीयकारः प्रयोण अष्टाध्याय्याः प्रत्येकं पादस्य कृते एकैकं सर्गं रचयामास। प्रथमाध्यायस्य प्रथमं पादं सञ्ज्ञापरिभाषाबहुलत्वात् परित्यज्य द्वितीयपादात् (गाङ्कुटादिपादात्) काव्यारम्भं चकार। तृतीयाध्यायस्य प्रथम-द्वितीयपादयोर्बृहत्परिमाणत्वात् प्रतिपादमुदाहर्तुं द्वौ द्वौ सर्गौ विरचितौ। प्रत्ययपादपूर्वार्धस्य कृतेऽष्टमः सर्गः प्रत्ययपादपश्चार्धस्य च कृते नवमः सर्गो रचितः। कर्मण्यण्पादपूर्वार्धस्य कृते दशमः सर्गः कर्मण्यण्पादपश्चार्धस्य च कृते एकादशः सर्गो विरचितः। ततश्चोणादिपादोदाहरणीभूतो द्वादशः सर्गो धातुसम्बन्धपादोदाहरणीभूतश्च त्रयोदशः सर्गो निबद्धः।

चतुर्थे पञ्चमे चाध्याये कविनोदाहरण-प्रदर्शनेऽतीव नैयून्यं कृतम्। अस्मिन्नध्यायद्वये द्वयोर्द्वयोः पादयोः कृते एकैकः सर्गो विरचितः। चतुर्थाध्यायस्य प्रथमपादं (ङ्याप्प्रातिपदिकात्पादं) द्वितीयपादं (तेन रक्तपादं) चोदाहर्तुं चतुर्दशः सर्गो रचितः। चतुर्थाध्यायस्य तृतीयपादं (युष्मदस्मत्पादं) चतुर्थपादं (प्राग्वहतेष्ठक्पादं) चोदाहर्तुं पञ्चदशः सर्गो विरचितः। षोडशेन सप्तदशेन च सर्गेण द्वौ द्वौ पादौ वैरल्येन समुदाहृत्य अध्यायमिमं समापितवान्। षष्ठाध्याय-प्रथमपादस्योदाहरणीभूते अष्टादशे सर्गे पुनरुदाहरणप्रदर्शनं पूर्वापेक्षया सम्पन्नं दृश्यते। षष्ठाध्यायस्य द्वितीयपादस्तु स्वरविषयत्वात् परित्यक्त एव। षष्ठाध्याय-तृतीयपादम् (अलुगुत्तरपादम्) उदाहर्तुम् एकोनविंशः सर्गो विरचितः। इतोऽग्रे षष्ठाध्याय-चतुर्थपादस्य (अङ्गपादस्य) उदाहरणार्थं विरचिते विंशे सर्गेऽपि भूमाकविरुदाहरणेषु भूमभावं समुद्भावयन् दृश्यते। सप्तमाध्याय-प्रथमपादं (युवोरनाकपादम्) उदाहर्तुम् एकविंशः सर्गो निबद्धः। सप्तमाध्यायस्य द्वितीयपादं (सिचि वृद्धिपादम्) उदाहर्तुं कविना द्वाविंशः सर्गो निबद्धः। सप्तमाध्यायस्य तृतीयपादं (देविकापादम्) उदाहर्तुं त्रयोविंशः सर्गो निबद्धः। चतुर्थपादं (णौ चङ्यादिपादम्) उदाहर्तुं चतुर्विंशः सर्गो निबद्धः। अष्टमाध्याय-प्रथमद्वितीयपादयोरुदाहरणानां प्रदर्शनार्थं पञ्चविंशः सर्गो विरचितः। तृतीयपादस्योदाहरणार्थं च षड्विंशः सर्गो निबद्धः। इत्थमेवाष्टमाध्यायस्य चतुर्थपादं (रषाभ्यां पादम्) उदाहर्तुं प्रणीते सप्तविंशेऽन्तिमे च सर्गेऽपि उदाहरणप्रस्तुतिः शोभना विपुला च दृश्यते।

**द्व्याश्रयमहाकाव्यम्:** द्वादश्याः शताब्द्याः पूर्वार्द्धे सुगृहीतनामा जैनाचार्यश्रीहेमचन्द्रसूरिः (१०८९-११७३) 'द्व्याश्रयमहाकाव्यम्' नामैतिहासिकं व्याकरणोदाहरणकाव्यं व्यरचयत्। काव्येऽस्मिन् अन्हिलवाडाया चालुक्यवंशावतंसात् मूलराजात् आरभ्य कुमारपालस्य गुर्जरेश्वराणामितिहासान् सुष्ठूपनिबन्ध। कविनात्र स्वसमकालीनशासकस्य शिष्यस्य कुमारपालस्य जैनधर्मस्य प्रचार-प्रसारार्थं कृतप्रयासानामुल्लेखः व्यायि। काव्येऽस्मिन् आचार्यो हेमचन्द्रो हेमशब्दानुशासनस्य सकलसूत्रोदाहरणप्रत्युदाहरणान्युपाहरत्।

**सुभद्राहरणम्:** केरलीयोदाहरणकाव्येषु ब्रह्मदत्तसूनोःकवेर्नारायणस्य 'सुभद्राहरणम्' नाम काव्यं षोडश्याः शताब्देः कृतिरिति सम्भावना। जनश्रुतिरियं कवेः परिचयः कालिकटेश्वरस्य मानविक्रमस्या 'सार्द्धाष्टादशकविनिवहस्यैकेन गृहीतनाम्नः निरुवेगप्पूरेण सहावर्तत। कविरयं व्याकरणविदग्धकुटल्लूरकुटुम्बजः इति केषाञ्चिन्मतम्। विश्वामित्रगोत्रोत्पन्नो नारायणो सुगृहीतनाम्नोर्जातवेदाष्टमूर्त्योः शिष्यस्य विख्यातविदुषो ब्रह्मदत्तस्य सूनुः। सुभद्राहरणस्याद्यस्य १३ पद्यैरन्त्येन च पद्येन कविः स्वपरिवारपरिचयं विस्तारशो व्यधत्त। सकलसाहित्यिकगुणगण-समन्वितं २० सर्गात्मकमिदं महाकाव्यं पाणिनीयोदाहरणानि (महाकाव्यस्य प्रमुखप्रयोजनम्) प्रदर्शयति। स्वव्याकरणप्रशिक्षणात्मकोद्देश्यपूर्त्यै कविना स्वयं काव्यारम्भेषु १६ सर्गेषु टीका व्यलेखि। त इमे १६ सर्गा व्याकरणोदाहरणानि नानाप्रकरणानुसारि प्रकाशयन्ति। शेषा ४ सर्गाः प्रसन्नकाण्डाख्या विशुद्धसाहित्यिकाः वर्तन्ते। कविः स्वयं टीकायां स्वकाव्यगतव्याकरणस्य नानाप्रकरणव्यवस्थां व्यनक्ति।

**वासुदेवविजयम्:** केरलवासि-कविवर-वासुदेवविरचितं 'वासुदेवविजयं नाम सप्तसर्गात्मकम् अद्भुतोदाहरणकाव्यं वरीवर्ति। कृतिरियमुच्चकोटिगता प्रौढतमा वैदुष्यपूर्णा च। अष्टकसूत्रोदाहरणानां सरसो रमणीयश्च प्रयोगोऽत्र लक्ष्यते। ६५७ श्लोकेष्वेवाष्टकसूत्रोदाहरणानां प्रस्तुतिः, काव्येऽष्टाध्यायाः संज्ञाप्रकरणं स्वरप्रकरणं च विहाय प्रायोऽखिलसूत्रोदाहरणानि दृश्यन्ते। बृहत्कायेषु व्याकरणोदाहरणकाव्येष्विदं लघुकायात्मकं विपुलोदाहरणयुतं काव्यं वर्तते। केरलवास्तव्यः कविकुलतिलको नारायणभट्टः स्वधातुकाव्यारम्भे श्रद्धास्पदं तत्रभवन्तमस्मरत्-

> उदाहृतं पाणिनिसूत्रमण्डलं, प्राग्वासुदेवेन तदूर्ध्वतोऽपरः।
> उदाहरत्यद्य वृकोदरोदितान्, धातून् क्रमेणैव हि माधवाश्रयात्।।
> (धातु०-१.१)

काव्येनानेन पाणिनीयसूत्रोदाहरणान्युपस्थापनाय कविर्भागवतमहापुराणस्य दशमस्कन्दस्यारम्भिकेषु ३६ अध्यायेषु समाविष्टकृष्णकथामुपजीव्यं चकार। वासुदेवविजयकारः सम्पूर्णाष्टाध्यायी चतुर्षु विभागेषु विभज्य प्रति विभागादुदाहरणान्याहृत्य काव्यरचनां चकार।

स्पष्टमिदम् अनेन यत् व्याकरणोदाहरणकाव्यानामनुशीलनेन उदाहरणार्थविषये विशेषेण स्पष्टता विशदता च जायते। यतो हि तत्र उदाहरणप्रयोगः विविधरूपेण दृश्यते। एतादृशं प्रयोगविषयं दृष्ट्वा छात्रस्य बुद्धिः विशेषेण विविधप्रयोगेषु

१. अष्टा०-२.२.३३
२. काशिका-२.२.३३
३. अर्जुनोऽयं यदुवंशशाखाभूते हैहयकुले समुत्पन्नः कृतवीर्यपुत्रः सहस्रार्जुन इति विश्रुतः।
४.अष्टा०-४.३.८७
५. अष्टा०-४.३.८८

प्रसरति। उदाहरणविषयकं ज्ञानं च व्यापकं भवति। एतेन व्याकरणज्ञानमपि सुदृढं जायते।

अतः व्याकरणोदाहरणार्थस्पष्टीकरणविषये पूर्वचर्चितानामुदाहरणकाव्यानां महती उपयोगिता विद्यते।

**'दण्डादिभ्यो यः'** अस्य सूत्रस्य काव्यगतप्रयोगाः–

**रघुवंशे**

स्थित्यै दण्डयतो दण्ड्यान् परिणेतुः प्रसूतये।
अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः[६]।।
दण्डमर्हन्तीति दण्ड्याः।

**शिशुपालवधे**

तमर्घ्यमर्घ्यादिकमादिपूरुषः सपर्यया साधु स पर्यपूपुजत्।
गृहानुपैतुं प्रणयादभीप्सवो भवन्ति नापुण्यकृतां मनीषिणः[७]।।
अर्घ्यं पूजार्हम्। अनेन यत्। अर्घार्थं पूजार्थं द्रव्यमर्घ्यम् । 'पादार्घाभ्यां च' इति तादर्थ्ये यत्।
स्वयमेव शन्तनुतनूज यमिह गणमर्घ्यमभ्यधाः।
तत्र मुररिपुरयं कतमो यमनिन्द्यबन्दिवदभिष्ठुषे वृथा[८]।।
अर्घ्यमर्घार्हम् पूर्जाहम्।

**अर्जुनरावणीये**

पुरार्त्विजीनानि कुलानि विप्रान् ये दक्षिणीयांश्च निघातयन्ति।
अताडयंस्तान्पुरुषा नरादान् दण्डेन दण्ड्यान् मुसलैर्मुसल्यान्[९]।।

**द्व्याश्रयमहाकाव्ये**

विंशस्तोमविदां मन्त्रैर्यज्ञियानां नु शीतगोः।
आभिषेचनिकस्योस्रैर्दण्ड्यं वध्यं तमोद्रवत्[१०]।।
शीतगोरिन्दोरुस्रैः किरणैः कृत्वा दण्ड्यं वध्यं च निग्रहं हिंसा चार्हत्।

**सुभद्राहरणे**

स दण्ड्यान् दण्डयन् पापान् मधुपर्क्यान् सतोऽर्चयन्।
पारायणिकपूजावान् राष्ट्रे तत्रामहीयत[११]।।
दण्डमर्हतः, मधुपर्कमर्हतः।

**वासुदेवविजये**

स्तम्भघ्नबाहुपरिघान् सुरसैनिकानां दण्ड्यान् जहि स्म खलु गौरिति मामयाचत्।
धात्रा सहावततरेह यतो दयार्द्रः पन्था ह्यमुष्य मुदमातनुते ममायम्[१२]।।
दण्ड्यान् दण्डयोग्यान् असुरान् जहि स्म विनाशय इति।
शैर्षच्छेदिकता त्वयि प्रकुपिते साम्राज्यभाजामपि श्वैतच्छत्रिकता प्रसीदति भवेदेवाणकानामपि।
आतः क्षाम्य गतत्रपस्य भगवन् मन्तुम्मुसल्यस्य मे रक्षां नाथ कुरु स्वलोकमयतो दत्स्वाभ्यनुज्ञामपि[१३]।।
गतत्रपस्य मुसल्यस्य मुसलेन वध्यस्य।

**चम्पूभारते**

आज्ञापथात्स्खलसि चेदणुमात्रमस्माद्**वध्यो** भविष्यसि सुखेन रणे रिपूणाम्[१४]।।
वध्यः वधार्हः।

एवंकृत्वा यदि उदाहरणार्थानां विवेचनं भवति, तेन यदि क्वचित् ग्रन्थान्तरेषु उदाहरणार्थे वैमत्यं प्राप्यते चेत् तस्य निर्देशपुरस्सरं समीक्षणमपि जायते। बहुत्र तूदाहरणार्थः प्रयोगान् अवलम्ब्यैव विवेचनो भवति। यत्र च प्रयोगे मतभेदो दृश्यते तस्य निर्देशपुरस्सरं समीक्षा अपि भवति। क्वचित् शोधितपाठाश्रयेण च क्वचिच्च उदाहरणस्य प्रयोगोपस्थापनेन भूयोऽपि विशदतामानीयते इत्थं रीत्या। अतः उदाहरणकाव्यानामुपयोगिता व्याकरणोदाहरणार्थज्ञाने अतीवास्ति।

६. रघुवंशम्-१.२५
७. शिशुपालवधम्-१.१४
८. शिशुपालवधम्-१५.२०
९. अर्जुनरावणीयम्-१६.१७
१०. द्व्याश्रयमहाकाव्यम्-१७.१०५
११. सुभद्राहरणम्-८.६५
१२. वासुदेवविजयम्-५.६४
१३. वासुदेवविजयम्-५.७६
१४. चम्पूभारतम्-५.८४